**संस्कृत-वार्ता:**

**03 अक्टूबरमासः 2023**

**सायम् - ०६:२०**

**मुख्यवार्ता:**

- **प्रधानमन्त्री नरेन्द्र-मोदिना उक्तं केन्द्रस्य भाजपेति दलस्य सर्वकार: देशे आधारभूत-संरचनाया: विकास-क्रमे ध्यानं प्रददाति, छत्तीसगढ़े सप्त-विंशति- सहस्र कोटी रूप्यकाधिक विकास-परियोजना समारब्धा।**
- **विश्व बैंक इत्यनेन वैश्विक-प्रतिकूल-परिस्थित्या: अनन्तरमपि द्विसहस्रत्रयोविंशति:-चतुर्विंशति: वर्षस्य कृते सकल-घरेलू-उत्पादवृद्धि दर: षड् दशमलव त्रि प्रतिशतं एव स्थापितम्।**
- **केन्द्रीय वित्तमन्त्री निर्मला सीतारमणः अद्य कोयम्बटूरनगरे लाभार्थिभ्यः प्रधानमन्त्री ऋणसहायतां वितरितवती।**
- **नेपाल देशे भूकम्पद्वयानन्तरम् अद्य राष्ट्रिय-राजधानी-दिल्ली समेत्य देशस्य-उत्तरी-भागेऽपि भूकम्पस्य अनुभव: जात:।**
- **बिहार-राज्ये अनवरत् वृष्ट्या कैमूर-जनपदस्य विभिन्न-स्थानेषु अकस्मात् जलाप्लव-सदृशा स्थिति: संजाता।**

**प्रधानमन्त्री/छत्तीसगढ़े**

**प्रधानमंत्री नरेन्द्र मोदिना उक्तं यत् केन्द्रे भारतीय-जनता-पार्टी इति दलस्य सर्वकार: देशे आधारभूत-संरचनाया: विकासे विशेष-ध्यानं प्रददाति।**

**अद्य छत्तीसगढ़स्य जगदलपुरे प्रधानमन्त्रिणा उक्तं यत् विगतेषु नव-वर्षेषु आधारभूत-सुविधानां विकासे व्ययं वर्धयित्वा दश-लक्ष-कोट्यावत् रूप्यकणि कृतम्। श्रीमोदी प्रोदीरितवान् यत् विकसित-भारतस्य स्वपनं तदैव साकार: भविष्यति, यदा देशस्य प्रत्येकं राज्यं, ग्रामं, जनपदं, ग्रामाश्च विकसिता: भविष्यन्ति। तेनोक्तं यत् विकसित-भारताय भौतिक, डिजिटल, सामाजिक-क्षेत्राणां सम्बद्धा मूलभूत-सुविधानां भविष्यस्यावश्यकतानुसारं सज्जता कर्तव्या भवति।**

प्रधानमंत्रिणा उक्तं यत् विगतेषु नव-वर्षेषु लौहोत्पादने भारतम् आत्मनिर्भरार्थम् अनेके महत्वपूर्ण-निर्णया: स्वीकृतम्। श्री मोदिना प्रोदीरितं यत् बस्तरे नागरनारे इत्यत्र राष्ट्रिय-खनिज-विकास-निगमस्य लौह-संयत्रेण वाहन-क्षेत्रं, रक्षा-क्षेत्रं च नूतनोर्जा प्राप्स्यते। तेन भणितं यत् बस्तरे विनिर्मितं लौहं न केवलं भारतीय-सैन्य-दलं सुदृढी-करोति अपितु भारतस्य रक्षा-निर्यातमपि अग्रे सारयति। श्री मोदिना उक्तं यत् बस्तरेत्यत्र संस्थापितं लौह-संयंत्रेण छत्तीसगढ़े पञ्चाशत्-सहस्रं यावत् यूनाम् वृत्यावसर: प्राप्यते। प्रधानमन्त्री-नरेन्द्र-मोदिना अद्य छत्तीसगढ़े आदिवासी-बस्तर-संभागस्य संभागीय मुख्यालये जगदलपुरे सप्तविंशति: सहस्र-कोटि-रूप्यकात्मकस्य विभिन्न-विकास-परियोजनानां शिलान्यास: विहित:। प्रधानमंत्रिणा बस्तरे नगरनारे चतुर्विंशति-सहस्र-कोटि रूप्यकाणां व्ययेन निर्मितं राष्ट्रिय-खनिज-विकास-निगमस्य नूतन-संयंत्रमपि राष्ट्राय-समर्पितम्। स्व जगदलपुर-यात्रावधौ प्रधानमन्त्रिणा जगदलपुर लौहयानस्थानकस्य जीर्णोद्धार-कार्यस्यापि शिलान्यासं कृतम्। तेन अंतागढ़ तरोकी इत्यनयो: मध्ये नूतन-रेल-मार्गं राष्ट्राय समर्पितम्। श्री मोदिना जगदलपुर दंतेवाड़ा इत्येतयो: मध्ये द्विगुणी-रेल-मार्ग-परियोजनाया: अपि लोकार्पणं कृतम्। एतासां परियोजनाभि: जनजातीय-क्षेत्रे-सम्पर्क-सुधार: आर्थिक-विकास: च भविष्यति।

**विश्वबैङ्केन**

विश्वबैङ्केन द्विसहस्र-त्रयोविंशतिः-चतुर्विंशतिः तमस्य वित्तवर्षस्य कृते भारतस्य वृद्धिदरस्य अनुमानं षड्-दशमलव-त्रि प्रतिशतं यावत् स्थापयितुं निर्णयः कृतः अस्ति । भारते अनेकानि बाह्य-समस्याः सन्ति चेदपि भारते नैरन्तर्येण सुदृढं-आर्थिक-वृद्धिं दृष्ट्वा निर्णयोऽयं स्वीकृतः अस्ति ।
अप्रैल मासस्य स्वीय-प्रतिवेदने विश्वबैङ्केन द्विसहस्र-त्रयोविंशति:-चतुर्विंशति तमे वर्षे भारतस्य वृद्धिदरस्य अनुमानं पूर्वस्य षड्- दशमलव-षड् प्रतिशतात् षड्-दशमलव-त्रि प्रतिशतं यावत् न्यूनीकृतम् आसीत् । भारतस्य विकासस्य विषये विश्वबैङ्कस्य नवीनतम-प्रतिवेदनानुसारं भारतस्य अर्थव्यवस्थायाः विषये अन्ताराष्ट्रियवित्तीयसंस्थानां अर्धवार्षिकप्रमुखप्रतिवेदने उक्तं यत् प्रमुखवैश्विकसमस्यानाम् उपरान्तम् अपि भारतं द्विसहस्र-द्वाविंशतिः-त्रयोविंशतिः तमे वर्षे सप्त-दशमलव-द्वि प्रतिशतस्य वृद्धिदरेण द्रुततरं वर्धमानं प्रमुखा अर्थव्यवस्थायां सम्मिलितः आसीत्।

**चेन्नई-निर्मला सीतारमणः**

**केन्द्रीय वित्तमन्त्री निर्मला सीतारमणः अद्य कोयम्बटूरनगरे लाभार्थिभ्यः पञ्चत्रिंशत्-सहस्र-कोटिरूप्यकाणां ऋणसहायतां वितरितवती। समारोहे वदन् मन्त्री महोदया प्रोक्तवती यत् सर्वप्रकारेण सर्वकारी-सहायतायाः कृते आकांक्षि जनपदेषु प्राथमिकता प्रदीयते। Credit Outreach Programme इति ऋण-वितरण-कार्यक्रमस्यअन्तर्गतं ऋणं वितरितम्। वित्तमन्त्री उक्तवती यत्, सर्वकारः जागरूकतां सृजति, ग्रामीणकृषकाः उद्यमिनः च लघुउद्यमिभ्यः व्यापारिभ्यः च प्रदत्तानां अनुदानानाम् ऋणानां च विषये अवगताः भवेयुः इति सुनिश्चितं कुर्वन्ती अस्ति।**

**भूकम्पः**

**नेपाल देशे चतुः दशमलव षड्, षड् दशमलव द्वि तीव्रतायुक्तौ भूकम्पद्वयानन्तरम् अद्य राष्ट्रिय-राजधानी-दिल्ली समेत्य देशस्य-उत्तरी-भागेऽपि भूकम्पस्य अनुभवः जातः। राष्ट्रिय-भूकम्प-विज्ञान केन्द्रेन उक्तं यत् भूकम्पस्य केन्द्रं नेपाले पञ्च किलोमीटर यावत् अधः आसीत्।**

**बिहार-जलाप्लवम्**

**बिहार-राज्ये अनवरत् वृष्ट्या कैमूर-जनपदस्य विभिन्न-स्थानेषु अकस्मात् जलाप्लव-सदृशा स्थितिः संजाता। अनवरत-वृष्ट्या कर्मनाशा, दुर्गावती, सुवारादि सामयिक-नद्यः उच्च जलस्तरेण भभुआ-नगरे कतिपय भवनानि, चिकित्सालयः, कार्यालयः च जलमग्ना जाता। डी.ए.वी. विद्यालये, कस्तूरबा-गांधी-आवासीय विद्यालयस्य परिसरे च जलाप्लवेन आपत् अवस्थायां विद्यालयीय छात्राः संरक्षिताः।**

**कैमूरस्य जनपदाधिकारिण उक्तं यत् प्राथमिक-स्वास्थ्य-केन्द्रात् गर्भवती महिलाभिः साकम् अन्येपि रूग्णा संरक्षिता। जनपदाधिकारिणा प्रोक्तं यत् स्थित्यानुसारंम् आपत् -प्रबन्धन-दलम् उच्च-सतर्कतायां स्थापितं वर्तते। ऋतु-विभागेन अद्य रोहतास, कैमूर-गया, औरंगाबादेत्यत्र अपि च समीपस्थ-विभिन्न-जनपदेषु अपि अति-वृष्टेः संचेतना ख्यापिता।**

**डोमिनिकनगणराज्यस्य**

**डोमिनिकनगणराज्यस्य उपराष्ट्रपतिः राकेल्-पेना-रोड्रिग्जः अद्य राष्ट्रपतिभवने राष्ट्रपतिद्रौपदी मुर्मू इत्यनया मिलितवती। उपराष्ट्रपतेः भारतस्य प्रथमयात्रायां स्वागतं कुर्वन्ती राष्ट्रपतिः मुर्मूः प्रोक्तवती यत् अस्य भ्रमणस्य समयः अतीव उपयुक्तो वर्तते यतोहि उभौ देशौ स्वीय-कूटनीतिकसम्बन्धस्य पञ्चविंशतिवर्षाणि आचरतः । राष्ट्रपतिः अवदत् यत् उभयोः देशयोः मध्ये द्विपाक्षिक-सम्बन्धाः सौहार्दपूर्णाः मैत्रीपूर्णा: च सन्ति। औषधपदार्थ- सामुद्रिकविज्ञान- ऋतुविज्ञान - आपदाप्रतिरोधी आधारभूतसंरचना- आंककीयप्रदान प्रौद्योगिकी- चेत्यादिषु क्षेत्रेषु पारस्परिक-कार्यं कर्तुं सम्भावना: अस्ति इति राष्ट्रपतिः मुर्मू अवदत्। भारतस्य डोमिनिकनगणराज्यस्य च सातत्येन आदानप्रदानं सम्पर्क: च द्विपक्षीयसम्बन्धान् इतोऽपि सुदृढी करिष्यति इति द्वयोः नेत्रोः मतम् आसीत्।**

**एशिया-क्रीडायां**

**चीनदेशस्य हाङ्गझौ-नगरे प्रचलति एशिया-क्रीडायां भारतस्य पदकस्य क्रमः नैरन्तर्येण प्रचलति। भारतम् अद्यावधौ दशमे दिने कांस्यपदकद्वयं प्राप्तवान्, येन कुल - त्रिषष्टि: पदकानि-त्रयोदश स्वर्ण, चतुर्विंशतिः रजत:, षड्विंशतिः-कांस्य पदकानि च। सम्प्रति देशः चतुर्थस्थाने अस्ति।**

**।। इति वार्ता: ।।**